# ज्यौतिषसोपानम्

(संस्कृतेन अनूदितम्)



श्रीमन्मध्वसिद्धान्तप्रबोधकसंस्कृतसंशोधनकेन्द्रम्

उडुपिक्षेत्रम्

(कर्नाटकसंस्कृतविश्वविद्यालयेन मानितम्)

2024

## ॥ प्रवेशः ॥

**यस्योदये जगदिदं प्रतिबोधमेति**
**मध्यस्थितौ प्रसरति प्रकृतिक्रियासु ।**
**अस्तङ्गतौ स्वपिति चोच्छ्वसितैकमात्रं**
**भानुः स एव जयति प्रकटप्रभावः ॥१॥**

यस्योदये चराचरात्मकमिदं जगत् जाग्रदवस्थां प्राप्नोति, यस्य गगनमध्यप्राप्तौ तदेव जगत् स्वस्य सर्वेषु कार्येषु प्रवृत्तं भवति, यस्य चास्तङ्गतौ तदेव जगत् पुनः श्वासप्रश्वासरूपाम् एकामेव क्रियां विदधानं स्वापावस्थां प्राप्नोति, सः रविः स्वस्य प्रभावं प्रकटयन् सर्वेष्वपि उत्कृष्टः सन् जयति । खं=गगनम् ।

**ज्योतिःशास्त्रस्वरूपम्**

**छन्दः पादौ शब्दशास्त्रं च वक्त्रं**
**कल्पः पाणी ज्यौतिषं चक्षुषी च ।**
**शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं**
**वेदस्याङ्गान्येवमाहुर्मुनीन्द्राः ॥ २ ॥**

छन्दः, व्याकरणम्, कल्पः, ज्यौतिषम्, शिक्षा, निरुक्तञ्चेति वेदस्य षडङ्गानि सन्ति । तेषु छन्दो वेदस्य पादौ, व्याकरणं मुखम्, कल्पः पाणी, ज्यौतिषं चक्षुषी, शिक्षा घ्राणम्, निरुक्तं च श्रोत्रं चेमानि षट् शास्त्राणि वेदपुरुषस्य अङ्गानीति मुनीन्द्राः कथयन्ति ॥ पाणी=हस्तौ, चक्षुषी=नेत्रे, घ्राणं=नासिका, श्रोत्रं=कर्णः, आहुः=कथयन्ति ।

**वेदास्तावद्यज्ञकर्मप्रवृत्ता**
**यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**
**शास्त्रादस्मात्कालबोधो यतः स्या-**
**द्वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ॥ ३ ॥**

वेदाः यज्ञकर्मार्थं प्रवृत्ताः । यज्ञास्तु कालाश्रयेण प्रोक्ताः । तस्य च कालस्य अवबोधः अस्मादेव ज्यौतिषशास्त्रात् । अत एवास्य ज्यौतिषस्य वेदाङ्गत्वम् ।

**वेदस्य चक्षुः किल शास्त्रमेतत्**
**प्रधानताङ्गेषु ततोऽस्य युक्ता ।**
**अङ्गैर्युतोऽन्यैरपि पूर्णमूर्ति-**
**श्चक्षुर्विना कः पुरुषत्वमेति ॥ ४ ॥**

वेदाङ्गरूपम् इदं ज्यौतिषं तस्य चक्षुरिव भवति । तस्मादस्य शास्त्रस्य वेदाङ्गेषु प्रधानत्वं यदुक्तं तद्युक्तमेव । **'सर्वेन्द्रियाणां नयनं प्रधानम्'** इति वचनात् मनुष्याणाम् अङ्गेषु नेत्रयोरेव प्राधान्यम् । यथा नेत्राभ्यां हीनो मानवः सर्वैरङ्गैः युक्तोऽपि पूर्णत्वं नोपयाति तथा ज्यौतिषेण हीनो वेदः ।

**तस्माद्द्विजैरध्ययनीयमेतत्**
**पुण्यं रहस्यं परमं च तत्त्वम् ।**
**यो ज्यौतिषं वेत्ति नरः स सम्यग्**
**धर्मार्थकामाँल्लभते यशश्च ॥ ५ ॥**

तस्मात् कारणात् द्विजैरिदं ज्यौतिषशास्त्रम् अवश्यम् अध्येतव्यम् । शास्त्रमेतत् पुण्यप्रदम्, रहस्यम् अत्युत्कृष्टं च वर्त्तते। यो नरः सम्यग् ज्यौतिषशास्त्रं जानाति सः धर्मम् अर्थं कामं प्राप्नोति यशश्च ॥
द्विजैः= ब्राह्मणक्षत्त्रियवैश्यैः, यशः=कीर्तिः ।

**सिद्धान्तसंहिताहोराश्चेति स्कन्धत्रयात्मकम् ।**
**वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम् ॥ ६ ॥**

सिद्धान्तः, संहिता, होरा चेति शास्त्रमिदं त्रिषु स्कन्धेषु विभक्तम्। वेदस्य निर्मलं चक्षुः अत्युत्तमं चेदं ज्यौतिषशास्त्रं **'त्रिस्कन्धज्यौतिषम्'** इत्येव प्रसिद्धं वर्तते ।

**जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।**
**अभिदधतीह षडङ्गान्याचार्या ज्यौतिषे महाशास्त्रे ॥ ७ ॥**

यथा वेदस्य षडङ्गानि तथास्य ज्यौतिषस्य जातकम्, गोलः, निमित्तम्, प्रश्नः, मुहूर्तः, गणितञ्चेति षडङ्गानि आचार्या अभिदधति ॥
अङ्गानि=उपकारकाणि, अभिदधति=कथयन्ति ।

**गोलो गणितश्चेति द्वितयं खलु गणितसंज्ञिते स्कन्धे ।**
**होरासंहितयोरपि निमित्तमन्यत्त्रयं च होराख्ये ॥ ८ ॥**

ज्यौतिषस्य अमीषु षट्सु अङ्गेषु गणितं गोलं चैतद्द्वयं गणितस्कन्धस्य अङ्गम् । निमित्तं तु होरा संहिता चेत्युभयोरपि स्कन्धयोः अङ्गम् । शिष्टानि च जातक-प्रश्न-मुहूर्ताख्यानि त्रीणि होरास्कन्धस्येति विवेकः ।

**पञ्चाङ्गपठनक्रमः**

**श्रीकल्याणसुधाकरं रिपुहरं दुःस्वप्नदोषापहं**
**गङ्गास्नानफलप्रदं शुभकरं गोदानसाम्यं नृणाम् ।**
**आयुर्वर्धनमुत्तमं मखफलं विद्वन्महाभूषणं**
**श्रेयःप्राप्तिकरं प्रभातसमये पञ्चाङ्गमाकर्ण्यताम् ॥ २७ ॥**

पञ्चाङ्गपठनं सम्पदं मङ्गलं च वितनोति । शत्रुनाशं करोति । दुस्स्वप्नदोषाणां वारणं करोति । गङ्गास्नानस्य फलं जनयति । शुभं करोति। गोदानतुल्यं पुण्यं ददाति । आयुषो वृद्धिं करोति । यज्ञफलं वितनोति । किञ्चेदं विदुषां महदेव किञ्चित् भूषणम् । एतादृशं श्रेयःप्राप्तिकरमिदं पञ्चाङ्गं प्रत्यहं प्रभातसमये प्रातःकाले अवश्यं श्रोतव्यम् ॥ प्रभातसमयः=प्रातःकालः ।

**संवत्सराः**

**प्रभवो विभवः शुक्लः प्रमोदश्च प्रजापतिः ।**
**अङ्गिराः श्रीमुखो भावो युवा धाता तथैव च ॥ २८ ॥**
**ईश्वरो बहुधान्यश्च प्रमाथी विक्रमो वृषः ।**
**चित्रभानुः स्वभानुश्च तारणः पार्थिवो व्ययः ॥ २९ ॥**
**सर्वजित्सर्वधारी च विरोधी विकृतिः खरः ।**
**नन्दनो विजयश्चैव जयो मन्मथदुर्मुखौ ॥ ३० ॥**
**हेमलम्बी विलम्बी च विकारी शार्वरी प्लवः ।**
**शुभकृच्छोभकृत्क्रोधी विश्वावसुपराभवौ ॥ ३१ ॥**
**प्लवङ्गः कीलकः सौम्यः साधारणो विरोधिकृत् ।**
**परिधावी प्रमादी च आनन्दो राक्षसो नलः ॥ ३२ ॥**
**पिङ्गलः कालयुक्तश्च सिद्धार्थी रौद्रदुर्मती ।**
**दुन्दुभी रुधिरोद्गारी रक्ताक्षी क्रोधनः क्षयः ॥ ३३ ॥**

| क्र.सं | संवत्सराः | क्र.सं | संवत्सराः | क्र.सं | संवत्सराः |
|---|---|---|---|---|---|
| १. | प्रभवः | २१. | सर्वजित् | ४१. | प्लवङ्गः |
| २. | विभवः | २२. | सर्वधारी | ४२. | कीलकः |
| ३. | शुक्लः | २३. | विरोधी | ४३. | सौम्यः |
| ४. | प्रमोदः | २४. | विकृतिः | ४४. | साधारणः |
| ५. | प्रजापतिः | २५. | खरः | ४५. | विरोधिकृत् |
| ६. | अङ्गिराः | २६. | नन्दनः | ४६. | परिधावी |
| ७. | श्रीमुखः | २७. | विजयः | ४७. | प्रमादी |
| ८. | भावः | २८. | जयः | ४८. | आनन्दः |
| ९. | युवा | २९. | मन्मथः | ४९. | राक्षसः |
| १०. | धाता | ३०. | दुर्मुखः | ५०. | नलः |
| ११. | ईश्वरः | ३१. | हेमलम्बी | ५१. | पिङ्गलः |
| १२. | बहुधान्यः | ३२. | विलम्बी | ५२. | कालयुक्तः |
| १३. | प्रमाथी | ३३. | विकारी | ५३. | सिद्धार्थी |
| १४. | विक्रमः | ३४. | शार्वरी | ५४. | रौद्रः |
| १५. | वृषः | ३५. | प्लवः | ५५. | दुर्मतिः |
| १६. | चित्रभानुः | ३६. | शुभकृत् | ५६. | दुन्दुभिः |
| १७. | स्वभानुः | ३७. | शोभकृत् | ५७. | रुधिरोद्गारी |
| १८. | तारणः | ३८. | क्रोधी | ५८. | रक्ताक्षी |
| १९. | पार्थिवः | ३९. | विश्वावसुः | ५९. | क्रोधनः |
| २०. | व्ययः | ४०. | पराभवः | ६०. | क्षयः |

**अयने**

**भानोर्मकरसङ्क्रान्तेः षण्मासा उत्तरायणम् ।**
**कर्कादेस्तु तथैव स्यात्षण्मासा दक्षिणायनम् ॥ ३४ ॥**

भानोः मकरसङ्क्रमणात् मासषट्कं यावदुत्तरायणं भवति । तस्यैव भानोः कर्कटकसङ्क्रमणात् मासषट्कं यावद्दक्षिणायनम् ।

**ऋतवः**

**वसन्तग्रीष्मकौ चैव वर्षर्तुशरदौ तथा ।**
**हेमन्तशिशिरौ चैव षडेते ऋतवः स्मृताः ॥ ३५ ॥**

एकस्मिन् वर्षे वसन्तः, ग्रीष्मः, वर्षाः, शरत्, हेमन्तः, शिशिरश्चेति षड्तवः ।

**चान्द्रमासाः**

**चैत्रवैशाखज्येष्ठाख्याश्चाषाढः श्रावणस्तथा ।**
**भाद्रश्चाश्वयुजश्चैव कार्त्तिको मार्गशीर्षकः ॥ ३६ ॥**
**पुष्यमासो माघमासस्तथा फाल्गुननामकः ।**
**एते द्वादशमासास्स्युश्चान्द्रमाने प्रकीर्तिताः ॥ ३७ ॥**

चैत्रः, वैशाखः, ज्येष्ठः, आषाढः, श्रावणः, भाद्रपदः, आश्वयुजः कार्त्तिकः, मार्गशीर्षः, पुष्यः, माघः, फाल्गुनश्चेति द्वादश चान्द्रमासाः ।

**सौरमासाः**

**मेषो वृषश्च मिथुनं कर्कः सिंहश्च कन्यका ।**
**तुला च वृश्चिकश्चैव धनुश्च मकरस्तथा ॥ ३८ ॥**
**कुम्भश्चैव तथा मीनः सौरमासाः प्रकीर्तिताः ॥ ३८$\frac{1}{2}$ ॥**

भानोः राशेः प्रवेशः सङ्क्रान्तिः । सङ्क्रान्तितः सङ्क्रान्त्यन्तरपर्यन्तः कालः 'सौरमासः' । एतादृशाः सौरमासाः वर्षे समवायेन द्वादश, ते यथा - मेषः, वृषभः, मिथुनम्, कर्कटः, सिंहः, कन्या, तुला, वृश्चिकः, धनुः, मकरः, कुम्भः, मीनश्च । एतेषां सौरमासानां नामान्येव द्वादशानां राशीनामपि नामानि ।

**तिथयः**

**प्रथमा च द्वितीया च तृतीया च चतुर्थिका ।**
**पञ्चमी च ततः षष्ठी सप्तमी चाष्टमी तथा ॥ ३९ ॥**
**नवमी दशमी चैकादशी च द्वादशी तथा ।**
**त्रयोदशीचतुर्दश्यौ पूर्णिमा दर्शनामिका ॥ ४० ॥**
**तिथयः पक्षभेदेन बुधैः पञ्चदश स्मृताः ॥ ४० $\frac{1}{2}$ ॥**

चान्द्रमासे शुक्लः कृष्णश्चेति द्वौ पक्षौ। तत्र शुक्लपक्षे प्रतिपत्, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी, अष्टमी, नवमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, चतुर्दशी, पूर्णिमा चेति क्रमेण तिथयः पञ्चदश । कृष्णपक्षेऽपि प्रतिपत्तः चतुर्दशीं यावत् तिथीनां नामानि शुक्लपक्षवदेव । पञ्चदश्यास्तु **अमावास्ये**ति विशेषः । अस्या एव **दर्श** इति नामान्तरम् ।

**वाराः**

**आदित्यवारः सोमश्च मङ्गलो बुधसंज्ञकः ।**
**बृहस्पतिः शुक्रशनी सप्त वाराः प्रकीर्तिताः ॥ ४१ ॥**

आदित्यवासरः, सोमवासरः, मङ्गलवासरः, बुधवासरः, गुरुवासरः, शुक्रवासरः, शनिवासरश्चेति समवायेन सप्त वासराः । वारस्य वासर इति शब्दान्तरम् ।

**नक्षत्राणि**

**अश्विनी भरणी चैव कृत्तिका रोहिणी मृगः ।**
**आर्द्रापुनर्वसू पुष्यस्तथाऽऽश्लेषा मघा तथा ॥ ४२ ॥**
**पूर्वा फल्गुनिका तस्मादुत्तरा फल्गुनी तथा ।**
**हस्तश्चित्रा तथा स्वाती विशाखा तदनन्तरम् ॥ ४३ ॥**
**अनुराधा ततो ज्येष्ठा तथा मूलं निगद्यते ।**
**पूर्वाषाढोत्तराषाढे अभिजिच्छ्रवणं तथा ॥ ४४ ॥**
**धनिष्ठा शतताराख्या पूर्वा भाद्रपदा तथा ।**
**उत्तरा भाद्रपदा स्यू रेवत्येतानि भानि च ॥ ४५ ॥**

अश्विनी, भरणी, कृत्तिका, रोहिणी, मृगशिरः, आर्द्रा, पुनर्वसुः, पुष्यः, आश्लेषा, मघा, पूर्वा फल्गुनी (पूर्वफल्गुनी), उत्तरा फल्गुनी (उत्तरफल्गुनी), हस्तः, चित्रा, स्वाती, विशाखा, अनुराधा, ज्येष्ठा, मूलम्, पूर्वाषाढा, उत्तराषाढा, श्रवणः, धनिष्ठा, शततारा (शतभिषक्), पूर्वा भाद्रपदा (पूर्वभाद्रपदा), उत्तरा भाद्रपदा (उत्तरभाद्रपदा), रेवती चेति एतानि सप्तविंशतिः भानि शास्त्रोपयुक्तानि सन्ति ॥ भानि नक्षत्राणि । एतानि विना 'अभिजित्' इत्यन्यदपि किञ्चित् नक्षत्रं वर्तते, यच्च उत्तराषाढा-श्रवणयोः अन्तराले विद्यते। मुहूर्तशास्त्रे एवास्य उपयोगः, न तु लोकव्यवहारे । तत्र तु केवलम् अभिजिद्रहितानि सप्तविंशतिरेव नक्षत्राणि उपयोगीनि ।

**नक्षत्रनिघण्टुः**

| | |
|---|---|
| **अश्विनी** | **भवत्यश्विनीनक्षत्रमश्वीदस्रस्तुरङ्गमः ।** |
| **भरणी** | **भरणी स्याद्यमो याम्यश्चान्तको यमसंज्ञकः ।** |
| **कृत्तिका** | **कृत्तिका बहुला ज्ञेया हुतभुग्वह्निसंज्ञिका ।** |
| **रोहिणी** | **रोहिणी च विधिर्ब्रह्मा प्राजापत्यश्चतुर्मुखः ।** |
| **मृगशिरः** | **मृगशीर्षं मृगश्चन्द्र ऐन्दवो हिमदीधितिः ।** |
| **आर्द्रा** | **आर्द्ररौद्रे च पुरजिच्छर्वः स्थाणुर्भवो हरः ।** |
| **पुनर्वसुः** | **पुनर्वस्वदिती देवमाता आदित्य एव च ।** |
| **पुष्यः** | **इज्यार्यौ पुष्यतिष्यौ च पूजितो गुरुनामकः ।** |
| **आश्लेषा** | **आश्लेषोरगसर्पाहिभुजङ्गव्यालसंज्ञकः ।** |
| **मघा** | **मघा पिता च पैत्रश्च मेखला पितृभं तथा ।** |
| **पूर्वा फल्गुनी** | **भाग्यं पूर्वफल्गुनी स्याद् भगाख्यं भगसंज्ञकम् ।** |
| **उत्तरा फल्गुनी** | **आर्यमर्यमणं चैव आर्यमं चोत्तरं तथा ।** |
| **हस्तः** | **हस्तसवितृसावित्रा अर्कस्सूर्यो दिवाकरः ।** |
| **चित्रा** | **चित्रा च त्वष्टृदैवत्यं त्वाष्ट्रेन्द्रो सुरवर्धकम् ।** |
| **स्वाती** | **स्वाती समीरणो वायुः पवनश्चानिलो मरुत् ।** |
| **विशाखा** | **विशाखा शूर्पमिन्द्राग्नि द्विदैवत्यं विशाखभम् ।** |

| | |
|---|---|
| अनुराधा | मित्रं मैत्रमनूराधमनुराधस्य संज्ञकम् । |
| ज्येष्ठा | ज्येष्ठेन्द्रो पुरुहूतश्च इन्द्रः शतमखस्तथा । |
| मूलम् | मूले निशाचरं प्रोक्तमासुरं निर्ऋतिस्तथा । |
| पूर्वाषाढा | पूर्वाषाढं जलं तोयमुदकं चाप एव च । |
| उत्तराषाढा | उत्तराषाढं च विश्वं चाभिजिद्वा प्रकाशकम् । |
| श्रवणम् | श्रवणं वैष्णवं श्रीशं श्रीकान्तं मुरजिद्धरिः । |
| धनिष्ठा | श्रविष्ठा च धनिष्ठा च वसुर्वासव एव च । |
| शतभिषक् | प्राचेतसो जलनिधिः शततारश्च वारुणः । |
| पूर्वा भाद्रपदा | अजैकपात्प्रोष्ठपदा पूर्वभाद्रपदा तथा । |
| उत्तरा भाद्रपदा | उत्तराभाद्रकं चैव ह्यहिर्बुध्निर्निशामुखम् । |
| रेवती | रेवतीं पौष्णमित्याहुरन्त्यः पूषा तथैव च । |

पूर्वकोष्ठकगतैः कारिकाखण्डैः नक्षत्राणां यानि पर्यायपदानि निर्दिष्टानि तेषामेवात्र स्फुटतया विवरणम् -

| नक्षत्राणि | पर्यायपदानि |
|---|---|
| अश्विनी | अश्वी, दस्रः, तुरङ्गमः |
| भरणी | यमः, याम्यः, अन्तकः |
| कृत्तिका | बहुला, हुतभुक्, वह्निः |
| रोहिणी | विधिः, ब्रह्मा, प्राजापत्यम्, चतुर्मुखः |
| मृगशिरः | मृगशीर्षम्, मृगः, चन्द्रः, ऐन्दवः, हिमदीधितिः |
| आर्द्रा | रौद्रः, पुरजित्, शर्वः, स्थाणुः, भवः, हरः |
| पुनर्वसुः | अदितिः, देवमाता, आदित्यः |
| पुष्यः | इज्यः, आर्यः, पुष्यः, तिष्यः, गुरुः |
| आश्लेषा | उरगः, सर्पः, अहिः, भुजङ्गः, व्यालः |
| मघा | मघा, पिता, पैत्रम्, मेखला, पितृभम् |
| पूर्वा फल्गुनी | भाग्यम्, पूर्वफल्गुनी, भगः |
| उत्तरा फल्गुनी | आर्यः, अर्यमा, आर्यमः, उत्तरा |
| हस्तः | सविता, सावित्रम्, अर्कः, सूर्यः, दिवाकरः |

| | |
|---|---|
| चित्रा | त्वष्टा, त्वाष्ट्रेन्द्रः, सुरवर्धकः |
| स्वाती | समीरणः, वायुः, पवनः, अनिलः, मरुत् |
| विशाखा | शूर्पः, इन्द्राग्नी, द्विदैवत्यम्, विशाखभम् |
| अनुराधा | मित्रम्, मैत्रम्, अनूराधा |
| ज्येष्ठा | इन्द्रः, पुरुहूतः, शतमखः |
| मूलम् | निशाचरः, आसुरः, निर्ऋतिः |
| पूर्वाषाढा | जलम्, उदकम्, तोयम्, आपः |
| उत्तराषाढा | विश्वः |
| अभिजित् | प्रकाशकः |
| श्रवणम् | वैष्णवम्, श्रीशः, श्रीकान्तः, मुरजित्, हरिः |
| धनिष्ठा | श्रविष्ठा, धनिष्ठा, वसुः, वासवः |
| शतभिषक् | प्राचेतसम्, जलनिधिः, शततारा, वारुणम् |
| पूर्वा भाद्रपदा | अजैकपात्, प्रोष्ठपदा |
| उत्तरा भाद्रपदा | उत्तरा भाद्रपदा, अहिर्बुध्निः, निशामुखम् |
| रेवती | पौष्णम्, अन्त्यम्, पूषा |

**अभिजिन्नक्षत्रम्** - उत्तराषाढानक्षत्रे अन्तिमचरणस्य श्रवणनक्षत्रे च आदिमघटिकाचतुष्टयस्य मेलनेन अभिजिन्नक्षत्रं भवति ।

**सप्तविंशतेः नक्षत्राणां मेषादिराशिषु विभागक्रमः**

भचक्रस्थाः राशयो द्वादश । नक्षत्राणि सप्तविंशतिः । प्रत्येकं नक्षत्रे चत्वारः पादाः । एवमाहत्य राशिचक्रे अष्टोत्तरं शतं (२७ × ४ = १०८) पादा भवन्ति । एतेन मेषादिषु प्रत्येकं राशौ नव नव पादा भवन्तीति ज्ञायते ।

यथा - अश्विन्याः चत्वारः, भरण्याः चत्वारः, कृत्तिकायाश्च प्रथम इत्येतैः नवभिः पादैः मेषराशिः भवति । कृत्तिकायाः द्वितीयादयः त्रयः, रोहिण्याः चत्वारः, मृगशिरसश्च प्रथमद्वितीयौ इत्येतैः नवभिः पादैः वृषभराशिः। एवंक्रमेण विभागः। वक्ष्यमाणैः वाक्यैः मेषादिषु राशिषु नक्षत्राणां कः कः पादः कुत्र कुत्र अन्तर्भवतीति ज्ञायते -

अश्विनीभरणीकृत्तिकापादो मेषः ।
कृत्तिकानां त्रयः पादाः रोहिणी मृगशीर्षार्धं वृषभः ।
मृगशीर्षार्धम् आर्द्रा पुनर्वसोः पादत्रयं मिथुनम् ।
पुनर्वसोः पादः पुष्याश्लेषान्तं कर्कटकः ।
मघा पूर्वा फल्गुनी उत्तरापादः सिंहः ।
उत्तरायास्त्रयः पादाः हस्तश्चित्रार्धं कन्या ।
चित्रार्धं स्वाती विशाखापादत्रयं तुला ।
विशाखापादः अनुराधा ज्येष्ठान्तं वृश्चिकः ।
मूलं पूर्वाषाढोत्तराषाढैकपादं धनुः ।
उत्तराषाढायाः त्रयः पादाः श्रवणं धनिष्ठार्धं मकरः ।
धनिष्ठार्धं शतभिषक् पूर्वाभाद्रापादत्रयं कुम्भः ।
पूर्वाभाद्रापादः उत्तरभाद्रा रेवत्यन्तं मीनः ।

| | | | |
|---|---|---|---|
| मीनः<br>पूर्वा भाद्रपदा-१<br>उत्तरा भाद्रपदा-४<br>रेवती-४ | मेषः<br>अश्विनी -४<br>भरणी-४<br>कृत्तिका-१ | वृषभः<br>कृत्तिका-३<br>रोहिणी-४<br>मृगशिरः-२ | मिथुनम्<br>मृगशिरः-२<br>आर्द्रा-४<br>पुनर्वसुः-३ |
| कुम्भः<br>धनिष्ठा-२<br>शतभिषक् -४<br>पूर्वा भाद्रपदा- ३ | | | कर्कटकः<br>पुनर्वसुः-१<br>पुष्यः-४<br>आश्लेषा-४ |
| मकरः<br>उत्तराषाढा-३<br>श्रवणम् -४<br>धनिष्ठा-२ | | | सिंहः<br>मघा-४<br>पूर्वा फल्गुनी-४<br>उत्तरा फल्गुनी-१ |
| धनुः<br>मूलम्-४<br>पूर्वाषाढा-४<br>उत्तराषाढा-१ | वृश्चिकः<br>विशाखा-१<br>अनुराधा-४<br>ज्येष्ठा-४ | तुला<br>चित्रा-२<br>स्वाती-४<br>विशाखा -३ | कन्या<br>उत्तरा फल्गुनी-३<br>हस्तः-४<br>चित्रा-२ |

| राशिः | नक्षत्रपादाः | राशयः अंशाः कलाश्च | राशिः | नक्षत्रपादाः | राशयः अंशाः कलाश्च |
|---|---|---|---|---|---|
| मेषः | अश्विनी - 1 | 00-03-20 | मिथुनम् | मृगशिरः - 3 | 02-03-20 |
| | अश्विनी - 2 | 00-06-40 | | मृगशिरः - 4 | 02-06-40 |
| | अश्विनी - 3 | 00-10-00 | | आर्द्रा - 1 | 02-10-00 |
| | अश्विनी - 4 | 00-13-20 | | आर्द्रा - 2 | 02-13-20 |
| | भरणी - 1 | 00-16-40 | | आर्द्रा - 3 | 02-16-40 |
| | भरणी - 2 | 00-20-00 | | आर्द्रा - 4 | 02-20-00 |
| | भरणी - 3 | 00-23-20 | | पुनर्वसुः - 1 | 02-23-20 |
| | भरणी - 4 | 00-26-40 | | पुनर्वसुः - 2 | 02-26-40 |
| | कृत्तिका - 1 | 01-00-00 | | पुनर्वसुः - 3 | 03-00-00 |
| वृषभः | कृत्तिका - 2 | 01-03-20 | कर्कटकः | पुनर्वसुः - 4 | 03-03-20 |
| | कृत्तिका - 3 | 01-06-40 | | पुष्यः - 1 | 03-06-40 |
| | कृत्तिका - 4 | 01-10-00 | | पुष्यः - 2 | 03-10-00 |
| | रोहिणी - 1 | 01-13-20 | | पुष्यः - 3 | 03-13-20 |
| | रोहिणी - 2 | 01-16-40 | | पुष्यः - 4 | 03-16-40 |
| | रोहिणी - 3 | 01-20-00 | | आश्लेषा - 1 | 03-20-00 |
| | रोहिणी - 4 | 01-23-20 | | आश्लेषा - 2 | 03-23-20 |
| | मृगशिरः - 1 | 01-26-40 | | आश्लेषा - 3 | 03-26-40 |
| | मृगशिरः - 2 | 02-00-00 | | आश्लेषा - 4 | 04-00-00 |

| राशिः | नक्षत्रपादाः | राशयः अंशाः कलाश्च | राशिः | नक्षत्रपादाः | राशयः अंशाः कलाश्च |
|---|---|---|---|---|---|
| सिंहः | मघा - 1 | 04-03-20 | तुला | चित्रा - 3 | 06-03-20 |
| | मघा - 2 | 04-06-40 | | चित्रा - 4 | 06-06-40 |
| | मघा - 3 | 04-10-00 | | स्वाती - 1 | 06-10-00 |
| | मघा - 4 | 04-13-20 | | स्वाती - 2 | 06-13-20 |
| | पूर्वा फल्गुनी - 1 | 04-16-40 | | स्वाती - 3 | 06-16-40 |
| | पूर्वा फल्गुनी - 2 | 04-20-00 | | स्वाती - 4 | 06-20-00 |
| | पूर्वा फल्गुनी - 3 | 04-23-20 | | विशाखा - 1 | 06-23-20 |
| | पूर्वा फल्गुनी - 4 | 04-26-40 | | विशाखा - 2 | 06-26-40 |
| | उत्तरा फल्गुनी-1 | 05-00-00 | | विशाखा - 3 | 07-00-00 |
| कन्या | उत्तरा फल्गुनी-2 | 05-03-20 | वृश्चिकः | विशाखा - 4 | 07-03-20 |
| | उत्तरा फल्गुनी-3 | 05-06-40 | | अनुराधा - 1 | 07-06-40 |
| | उत्तरा फल्गुनी-4 | 05-10-00 | | अनुराधा - 2 | 07-10-00 |
| | हस्तः - 1 | 05-13-20 | | अनुराधा - 3 | 07-13-20 |
| | हस्तः - 2 | 05-16-40 | | अनुराधा - 4 | 07-16-40 |
| | हस्तः - 3 | 05-20-00 | | ज्येष्ठा - 1 | 07-20-00 |
| | हस्तः - 4 | 05-23-20 | | ज्येष्ठा - 2 | 07-23-20 |
| | चित्रा - 1 | 05-26-40 | | ज्येष्ठा - 3 | 07-26-40 |
| | चित्रा - 2 | 06-00-00 | | ज्येष्ठा - 4 | 08-00-00 |

| राशिः | नक्षत्रपादाः | राशयः अंशाः कलाश्च | राशिः | नक्षत्रपादाः | राशयः अंशाः कलाश्च |
|---|---|---|---|---|---|
| | मूलम् - 1 | 08-03-20 | | धनिष्ठा - 3 | 10-03-20 |
| | मूलम् - 2 | 08-06-40 | | धनिष्ठा - 4 | 10-06-40 |
| | मूलम् - 3 | 08-10-00 | | शतभिषक् - 1 | 10-10-00 |
| | मूलम् - 4 | 08-13-20 | | शतभिषक् - 2 | 10-13-20 |
| धनुः | पूर्वाषाढा - 1 | 08-16-40 | कुम्भः | शतभिषक् - 3 | 10-16-40 |
| | पूर्वाषाढा - 2 | 08-20-00 | | शतभिषक् - 4 | 10-20-00 |
| | पूर्वाषाढा - 3 | 08-23-20 | | पूर्वा भाद्रपदा -1 | 10-23-20 |
| | पूर्वाषाढा - 4 | 08-26-40 | | पूर्वा भाद्रपदा-2 | 10-26-40 |
| | उत्तराषाढा - 1 | 09-00-00 | | पूर्वा भाद्रपदा-3 | 11-00-00 |
| | उत्तराषाढा - 2 | 09-03-20 | | पूर्वा भाद्रपदा-4 | 11-03-20 |
| | उत्तराषाढा - 3 | 09-06-40 | | उत्तरा भाद्रपदा-1 | 11-06-40 |
| | उत्तराषाढा - 4 | 09-10-00 | | उत्तरा भाद्रपदा-2 | 11-10-00 |
| | श्रवणम् - 1 | 09-13-20 | | उत्तरा भाद्रपदा-3 | 11-13-20 |
| मकरः | श्रवणम् - 2 | 09-16-40 | मीनः | उत्तरा भाद्रपदा-4 | 11-16-40 |
| | श्रवणम् - 3 | 09-20-00 | | रेवती - 1 | 11-20-00 |
| | श्रवणम् - 4 | 09-23-20 | | रेवती - 2 | 11-23-20 |
| | धनिष्ठा - 1 | 09-26-40 | | रेवती - 3 | 11-26-40 |
| | धनिष्ठा - 2 | 10-00-00 | | रेवती – 4 | 00-00-00 |

**योगाः**

**विष्कम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ।**
**अतिगण्डः सुकर्मा च धृतिः शूलस्तथैव च ॥ ४६ ॥**
**गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।**
**वज्रः सिद्धिर्व्यतीपातो वरीयान् परिघः शिवः ॥ ४७ ॥**
**सिद्धः साध्यः शुभः शुक्लः ब्रह्म चैन्द्रश्च वैधृतिः ॥ $४७\frac{१}{२}$ ॥**

विष्कम्भः, प्रीतिः, आयुष्मान्, सौभाग्यम्, शोभनः, अतिगण्डः, सुकर्मा, धृतिः, शूलः, गण्डः, वृद्धिः, ध्रुवः, व्याघातः, हर्षणः, वज्रः, सिद्धिः, व्यतीपातः, वरीयान्, परिघः, शिवः, सिद्धः, साध्यः, शुभः, शुक्लः, ब्रह्म, ऐन्द्रः, वैधृतिश्चेति सप्तविंशतिः नित्ययोगाः ।

**करणानि**

बवबालवकौलवतैतिलगरजवणिजविष्टिनामानि ।
चरकरणानि **विदुः** शुक्लप्रथमान्त्यार्धपूर्वाणि ॥ ४८ ॥
स्थिरकरणान्यसितचतुर्दश्यपरार्धादिकानि **चत्वारि** ।
प्राहुश्शकुनिचतुष्पात्सनागकिंस्तुघ्ननामानि ॥ ४९ ॥

करणं चरं स्थिरं चेति द्विविधम् । तत्र चराणि करणानि सप्त, यथा - बवम्, बालवम्, कौलवम्, तैतिलम्, गरजम्, वणिजम्, विष्टिश्च । विष्टेः भद्रेति नामान्तरम् । स्थिराणि पुनः चत्वारि, यथा - शकुनिः, चतुष्पाद्, नागवान्, किंस्तुघ्नं च ।

**'तिथ्यर्धं करणम्'** इति वचनात् तिथ्यर्धे एकैकं करणमिति प्रत्येकं तिथौ करणद्वयं नियतम् । मासे त्रिंशत् तिथय इति हेतोः षष्टिः करणानि अपेक्ष्यन्ते । करणानि पुनः सप्त चत्वारि चेति समवायेन एकादशैव । तस्मात् सर्वास्वपि तिथिषु करणानां सम्पादनार्थम् चरकरणानाम् अष्टवारम् आवर्तनं क्रियते । तेन षट्पञ्चाशत् (७ × ८ = ५६) करणानि सिद्धानि । चतुर्भिः स्थिरैः सह तेषां संख्या षष्टिर्जायते (५६ + ४=६०) । तत्रायं करणानां विभागः -

तत्र शुक्लपक्षस्य प्रतिपत्तिथेः उत्तरार्धादारभ्य प्रत्येकं तिथौ द्वे द्वे करणे इति अष्टवारम् आवृत्तानि सप्त चरकरणानि । एतेन कृष्णपक्षस्य चतुर्दश्याः पूर्वार्धं यावत् आवृत्तानि चराण्येव करणानीति सिद्धम् । तस्यैव पक्षस्य चतुर्दश्या उत्तरार्धादारभ्य प्रतिपत्पूर्वार्धं यावत् चत्वारि स्थिरकरणानि। एतेन सर्वासामपि तिथीनां करणानि सिद्धानि ।

**नक्षत्रवारतिथयः करणानि योगाः पञ्चाङ्गमेतत्** इत्युक्तप्रकारेण तिथिः, वारः, नक्षत्रम्, योगः, करणं चैतानि पञ्चाङ्गानि इत्युच्यन्ते ।

**पञ्चाङ्गज्ञानम्**

चान्द्रमानस्य अनुसारेण पञ्चाङ्गेषु चैत्रमासस्य आदितः (चान्द्रयुगादितः) संवत्सरस्यारम्भः । सौरमानस्य पुनः मेषसङ्क्रान्तितः (सौरयुगादितः) इति विवेकः।

पञ्चाङ्गपुस्तकस्य प्रतिपृष्ठम् उपरितनपङ्क्तौ प्रथमं शालिवाहनशके गतानां वर्षाणां सङ्ख्या लिख्यते । केषुचित्तु पुस्तकेषु वर्तमानस्य वर्षस्य सङ्ख्येति विशेषः । ततः संवत्सरः, चान्द्रमासस्य नाम, पक्षः, अयनम्, ऋतुश्चेत्येते क्रमेण लिख्यन्ते।

तस्य वामे भागे सौरमासस्य नाम, ततोऽधः लम्बपङ्क्तौ गतानि तदीयानि दिनानि लिख्यन्ते, वामतरे तु भागे अङ्लमासस्य नाम, ततोऽधः लम्बपङ्क्तौ तदीयाश्च दिनाङ्काः । अन्यत्सर्वमपि तिथिवाराद्यात्मकस्य पञ्चाङ्गस्य विवरणं क्रमेण द्वितीयादिषु तिरश्चीनासु पङ्क्तिषु ।

मेषसङ्क्रान्तिर्नाम सूर्यस्य मेषराशिप्रवेशकालः। पञ्चाङ्गपुस्तके यस्मिन् दिनाङ्के मेषसङ्क्रान्तिरिति सूचितं तस्मात् दिनाङ्कादारभ्य यस्मिन् दिनाङ्के वृषभसङ्क्रान्तिरिति सूच्यते तद्दिनाङ्कं यावत् मेषाख्यः सौरमास इति बोध्यम्। वृषभसङ्क्रान्तित आरभ्य मिथुनसङ्क्रान्तिं यावत् वृषभमासः। अनेन क्रमेण मीनपर्यन्ताः सौरमासाः ज्ञातव्याः । यस्मिन् दिनाङ्के मेषादिसङ्क्रान्तिः सूच्यते ततः अग्रिमदिनादारभ्य लम्बपङ्क्तौ सौरमासे गतानि दिनानि लिख्यन्ते, यथा एप्रिलादिमासीया दिनाङ्काः ।

एवमत्र तिर्यक्तया दृष्टेः प्रसारणे प्रथमम् आङ्लमासस्य दिनाङ्काः, ततः सौरमासे गतानि दिनानि, ततः तिथयः, ततो वासराः, ततः तिथिघटिकाः, ततो नक्षत्राणि, ततः तद्घटिकाः, ततो योगाः, ततः तद्घटिकाः, ततः करणानि, ततः तद्घटिकाः, ततो विषम्, ततः तदारम्भघटिकाः, ततः अमृतम्, ततश्च तदारम्भघटिका इत्येते अंशा दृग्गोचरीभवन्ति । ततश्च ग्रहाः कस्मिन् कस्मिन् राशौ भवन्ति? तत्रापि कस्मिन् कस्मिन् पादे इत्यस्य विवरणम् । पर्यन्ते तु तत्तद्दिवसे सम्भवतां पर्वादीनां विशेषाणां निर्देशनम् ।

सर्वथा अधस्तन्यां तु पङ्क्तौ पूर्णिमायाम् अमायां वा तिथौ सूर्योदयकाले ग्रहाश्च कस्मिन् कस्मिन् नक्षत्रे कस्मिन् कस्मिंश्च पादे सन्तीति विवरणमस्ति, यथा - अश्वि१र, ध४कु इत्यादि । अस्य तावत् अश्विन्यां प्रथमे पादे रविर्वर्तते, धनिष्ठायां चतुर्थे पादे कुज इत्यभिप्रायः ।

कर्णाटकीयपञ्चाङ्गेषु सर्वत्रापि सौरमासे गतानां दिनानां तिथिवारादीनां च संख्या प्रायेण कन्नडलिप्या निबध्यते ।

घटिकाश्च या निर्दिष्टाः ताः सर्वा अपि तत्तद्दिवसीयसूर्योदयकालात् अनन्तरम् एष्या इति बोध्यम् । तासु सर्वासु घटिकासु व्यतीतासु सतीषु सूर्योदयकालिकानां तिथि-नक्षत्र-योग-करणानां समाप्तिः । ततः अनुक्तावपि अग्रिमतिथि-नक्षत्र-योग-करणानाम् आरम्भ इति बोध्यम् । इदं तावत् नित्यपञ्चाङ्गम् ।

पञ्चाङ्गपुस्तके कुत्रचित् तिथि-नक्षत्र-योग-करणानां या घटीविघटिकाः तासाम् अग्रतः ‘उपरि’ इति विलिख्य तत्पुरतः अन्यामेव घटीविघटिकासङ्ख्यां निर्दिशन्ति । तदा सूर्योदयादनन्तरं पूर्वतनतिथ्यादेः घटीविघटिकासु व्यतीतासु तदग्रिमतिथि-नक्षत्र-योग-करणानि निर्दिष्टघटीविघटीपर्यन्तं भविष्यन्तीति अभिप्रायः । बहुषु पुस्तकेषु घटिकानां पादम्, अर्धम्, पादोनं च भागं $\frac{१}{४}$, $\frac{१}{२}$, $\frac{३}{४}$ एवं लेखनेन सूचयन्ति, क्वचित्तु ।, ॥, ॥। इत्येवं लम्बरेखाणां न्यसनेनेति विशेषः ।

पञ्चाङ्गपुस्तके विषम् अमृतं च 'वि' 'अ' इति वर्णाभ्यां निर्दिश्य तदग्रतः घटिका निर्दिशन्ति । तत्र सूर्योदयदनन्तरं तावतीषु घटिकासु व्यतीतासु तद्दिने तदग्रिमाः चतस्रो घटिकाः 'विषकालः' 'अमृतकालः' वेति बोध्यम् । ततश्च ता घटीविघटिकाः विषस्य अमृतस्य वा आरम्भस्य बोधिका इति ज्ञेयम् ।

क्वचित् घटिकाचतुष्टयात्मको विषकालः अमृतकालो वा रात्रेः अन्ते भवति तदा अग्रिमदिवसेऽपि स अनुवर्तते । तदा तु निर्दिष्टः शिष्टघटिकात्मकः कालः वि.शे. अथवा अ.शे. इति शब्दाभ्यां निर्दिश्यते । तयोश्च यथाक्रमं विषशेषः अमृतशेष इत्यर्थः । तत्र सूर्योदयादनन्तरं तावान् कालो विषमय इति अमृतमय इति वा यथासम्भवं बोध्यम् ।

तिथ्यर्धं करणम् । तत्र प्रत्येकस्मिन् चान्द्रमासे बवादीनि यानि सप्त चरकरणानि तेषां शुक्लपक्षस्य प्रतिपदः उत्तरार्धात् आरभ्य कृष्णपक्षस्य चतुर्दश्याः पूर्वार्धं यावत् अष्टवारं क्रमेण आवर्तनं भवति । यानि पुनः शकुन्यादीनि चत्वारि स्थिरकरणानि तेषां तु कृष्णपक्षस्य चतुर्दश्याः उत्तरार्धात् आरभ्य शुक्लपक्षस्य प्रतिपदः पूर्वार्धं यावत् क्रमेण उपस्थितिः।

न च तेषामपि आवर्तनम्, षट्पञ्चाशति तिथ्यर्धेषु अष्टवारम् आवृत्तानाम् चरकरणानाम्, तिथ्यर्धचतुष्टये च स्थिरकरणानां यथाक्रमम् उपस्थानात् । एकस्मिन् चान्द्रमासे त्रिंशत् तिथयः, षष्टिश्च तिथ्यर्धानि । करणे च प्रत्यहं द्वे इति मासे षष्टिरिति सर्वं सङ्गतम् ।{(८×७)+४ = ५६+४ = ६० करणानि}

### पञ्चाङ्गपुस्तकगतानां तिथ्यादीनां संज्ञाक्षराणि

**तिथयः**

| | | |
|---|---|---|
| १ = प्रतिपत् | २ = द्वितीया | ३ = तृतीया |
| ४ = चतुर्थी | ५ = पञ्चमी | ६ = षष्ठी |
| ७ = सप्तमी | ८ = अष्टमी | ९ = नवमी |
| १० = दशमी | ११ = एकादशी | १२ = द्वादशी |

१३ = त्रयोदशी १४ = चतुर्दशी १५ = पूर्णिमा,
३० = अमावास्या

**वाराः**

र = रविवासरः, च = चन्द्रवासरः, कु = कुजवासरः, बु=बुधवासरः, गु = गुरुवासरः, शु = शुक्रवासरः, श = शनिवासरः ।

**नक्षत्राणि**

अश्वि = अश्विनी, भ = भरणी, कृ = कृत्तिका, रो = रोहिणी, मृ=मृगशिरः, आर् = आर्द्रा, पु = पुनर्वसुः, प्यु = पुष्यः, आश्ले=आश्लेषा, म = मघा, पू = पूर्वफल्गुनी, उ = उत्तरफल्गुनी, ह=हस्तः, चि = चित्रा, स्वा = स्वाती, वि = विशाखा, अनु = अनुराधा, ज्ये = ज्येष्ठा, मू=मूलम्, ष्पू = पूर्वाषाढा, उषा = उत्तराषाढा, श्र=श्रवणः, ध = धनिष्ठा, श्त = शतभिषक्, प्भू = पूर्वा भाद्रपदा, उभा=उत्तरा भाद्रपदा, रे = रेवती ।

**योगाः**

| | | |
|---|---|---|
| व्कि = विष्कम्भः | प्री - प्रीतिः | आ = आयुष्मान् |
| सौ = सौभाग्यम् | शो = शोभनम् | अति = अतिगण्डः |
| स्कु = सुकर्मा | धृ = धृतिः | शू = शूलः |
| गं = गण्डः | वृ = वृद्धिः | ध्रु = ध्रुवः |
| व्या = व्याघातः | हर् = हर्षणः | व्र = वज्रः |
| सि = सिद्धिः | व्य = व्यतीपातः | वरी = वरीयान् |
| प = परिघः | शि = शिवः | सि = सिद्धः |
| सा = साध्यः | शु = शुभः | श्लु = शुक्लः |
| ब्र = ब्रह्म | ऐ = ऐन्द्रः | वै = वैधृतिः |

**करणानि**

ब = बवम् (सिंहः), बा = बालवम् (व्याघ्रः), कौ = कौलवम् (वराहः), तै = तैतिलम् (रासभम्), ग = गरजम् (गजः), व = वणिजम्

(महिषी), भ = भद्रम्=वि= विष्टिः (हयः), श = शकुनिः (शुनकः), च चतुष्पाद् (वृषभः), ना = नागवान् (सर्पः), किं = किंस्तुघ्नम् (कुक्कुटः)।

**विषं तथा अमृतम्**

वि = विषम् , अ = अमृतम्, वि.शे = विषशेषः, अ.शे = अमृतशेषः ।

**पञ्चाङ्गश्रवणफलम्**

**भूरिश्रीविभवस्तिथिश्रवणतो वारान्महायुर्भवे-**
**न्नक्षत्रं कृतपापसञ्चयहरं योगस्तु रोगापहा ।**
**यच्चित्तेप्सितमाशु तच्च करणात्सम्प्राप्यते मानवै-**
**श्श्रोतव्यं बहुयज्ञपुण्यफलदं पञ्चाङ्गमेतच्छुभम् ॥ ५० ॥**

तिथेः श्रवणात् प्रभूता सम्पत् लभ्यते, वारस्य श्रवणात् दीर्घायुः, नक्षत्रस्य श्रवणात् पापसमूहो नश्यति, करणस्य श्रवणात् अभीप्सितोऽर्थः आश्वेव सिध्यति, योगस्य च श्रवणात् रोगो दूरीभवति । अत एव मङ्गलफलजनकं बहुयज्ञपुण्यदायकं चेदं पञ्चाङ्गश्रवणं प्रत्यहं सर्वैरपि मानवैः अवश्यं करणीयम् । अत्रैवार्थे श्लोकान्तरम्, यथा -

**तिथेश्च श्रियमाप्नोति वारादायुष्यवर्धनम् ।**
**नक्षत्राद्धरते पापं योगाद्रोगनिवारणम् ॥ ५१ ॥**
**करणात्कार्यसिद्धिश्च पञ्चाङ्गफलमुत्तमम् ॥ १/२ ॥**
**पञ्चाङ्गं पठितुं नित्यं श्रोतुमिच्छन्ति ये नराः ।**
**अग्निष्टोमफलं तेषां गङ्गास्नानं दिने दिने ॥ ५२ ॥**

तिथिश्रवणात् सम्पत्प्राप्तिः, वारश्रवणात् आयुष्यवर्धनम्, नक्षत्रश्रवणात् पापनिवारणम्, योगश्रवणात् रोगनिवृत्तिः, करणश्रवणाच्च कार्यसिद्धिः । यः पञ्चाङ्गं नित्यं पिपठिषति शुश्रूषते वा तस्य प्रत्यहम् अग्निष्टोमयागजन्यस्य गङ्गास्नानजन्यस्य च पुण्यस्य प्राप्तिः ।

राशिरिति शब्दस्य क्षेत्रम्, गृहम्, ऋक्षम्, भम्, भवनं चेति पञ्च समानार्थकानि पदानि ।

**मेषादिराशीनां पर्यायपदानि**

**मेषाजविश्वक्रियतुम्बुराद्या वृषोक्षगोतावुरुगोकुलानि ।**
**द्वन्द्वं नृयुग्मं जितुमं यमं च युगं तृतीयं मिथुनं वदन्ति ॥**
**कुलीरकर्काटककर्कटाख्याः कण्ठीरवः सिंहमृगेन्द्रलेयाः ।**
**पार्थोनकन्यारमणीतरुण्यस्तौलीवणिग्जूकतुलाधटाश्च ॥**
**अल्यष्टमं वृश्चिककौर्पिकीटा धन्वी धनुश्चापशरासनानि ।**
**मृगो मृगास्यो मकरश्च नक्रः कुम्भो घटस्तोयधराभिधानः ॥**
**मीनान्त्यमत्स्यपृथुरोमझषा वदन्ति**
**दस्रादिकर्क्षनवपादयुताः क्रियाद्याः ।**
**चक्रस्थिता दिविचरा दिननाथमुख्याः**
**क्षेत्रर्क्षराशिभवनानि भसंज्ञितानि ॥**

एषु श्लोकेषु यथाक्रमं मेषादीनां राशीनां पर्यायपदान्युक्तानि । तानि अनेन कोष्ठकेन अवगन्तुं शक्यन्ते -

| **क्र-सं-** | **राशयः** | **पर्यायपदानि** |
|---|---|---|
| १. | मेषः | अजः, विश्वः, क्रियः, तुम्बुरुः, आद्यः |
| २. | वृषभः | वृषः, उक्षा, गौः, तावुरुः, गोकुलम् |
| ३. | मिथुनम् | द्वन्द्वम्, नृयुग्मम्, जितुमम्, यमम्, युगम्, तृतीयम् |
| ४. | कर्काटकः | कुलीरः , कर्काटकः, कर्कटः |
| ५. | सिंहः | कण्ठीरवः, सिंहः, मृगेन्द्रः, लेयः |
| ६. | कन्या | पार्थोना (पाथोना), कन्या, रमणी, तरुणी |
| ७. | तुला | तौली, वणिक्, जूकः, तुला, धटः |
| ८. | वृश्चिकः | अलिः, अष्टमम्, वृश्चिकः, कौर्पिः, कीटः |
| ९. | धनुः | धन्वी, धनुः, चापः, शरासनम् |

| | | |
|---|---|---|
| १०. | मकरः | मृगः, मृगास्यः, मकरः, नक्रः |
| ११. | कुम्भः | कुम्भः, घटः, तोयधरः |
| १२. | मीनः | मीनः, अन्त्यः, मत्स्यः, पृथुरोमा, झषः |

# ग्रहशीलनिरूपणम्

नवग्रहाणां पर्यायपदानि

हेलिः सूर्यश्चन्द्रमाः शीतरश्मिर्हैम्ना विज्ञो बोधनश्चेन्दुपुत्रः ।
आरो वक्रः क्रूरदृक्चावनेयः कोणो मन्दः सूर्यपुत्रोऽसितश्च ॥
जीवोऽङ्गिराः सुरगुरुर्वचसां पतीज्यः
शुक्रो भृगुर्भृगुसुतः सित आस्फुजिच्च ।
राहुस्तमोऽगुरसुरश्च शिखीति केतुः
पर्यायमन्यमुपलभ्य वदेच्च लोकात् ॥

अत्र नवग्रहाणां कानिचन पर्यायपदानि दत्तानि । नवग्रहाणाम् अन्यान्यपि बहूनि पर्यायपदानि सन्ति । तानि कोशग्रन्थेभ्यः तथा लोकव्यवहारतः ज्ञातव्यानि ।

| ग्रहाः | पर्यायपदानि |
| --- | --- |
| रविः | हेलिः, सूर्यः, दिनकृत्, भास्करः, तिग्मकिरणः |
| चन्द्रः | चन्द्रमाः, शीतरश्मिः, तिग्मांशुः, विधुः, इन्दुः, सुधांशुः, शशभृत्, शीतकिरणः, शीतगुः |
| कुजः | आरः, वक्रः, क्रूरदृक्, आवनेयः, भौमः, भूमिजः, भूमिपुत्रः |
| बुधः | हेम्ना, हेमा, वित्, ज्ञः, बोधनः, इन्दुपुत्रः |
| गुरुः | जीवः, अङ्गिराः, सुरगुरुः, वचसां पतिः, इज्यः, देवेड्यः, देवमन्त्री |
| शुक्रः | शुक्रः, भृगुः, भृगुसुतः, सितः, आस्फुजित्, दैत्यमन्त्री, असुराचार्यः |
| शनिः | कोणः, मन्दः, सूर्यपुत्रः, असितः, शनैश्चरः, सूर्यजः |
| राहुः | तमः, अगुः, असुरः, स्वर्भानुः, सैंहिकेयः |
| केतुः | शिखी |